# ३. पादुका सहस्रम् - प्रभाव पद्धतिः (७०)

वन्दे तद्रङ्गनाथस्य मान्यं पादुकयो र्युगम् ।
उन्नताना मवनति र्नतानां यत्र चोन्नतिः ॥ ३.१॥ ३१॥

निश्शेष मम्बर तलं यदि पत्रिका स्यात्
सप्तार्णवी यदि समेत्य मषी भवित्री ।
वक्ता सहस्र वदनः पुरुषः स्वयं चेत्
लिख्येत रङ्गपति पादुकयोः प्रभावः ॥ ३.२॥ ३२॥

वेदोप बृंहण कुतूहलिना निबद्धं
विश्वम्भरा श्रुति भवेन महर्षिणा यत् ।
व्यासेन यच्च मधुसूदन पादरक्षे
द्वे चक्षुषी त्वदनुभाव मवेक्षितुं नः ॥ ३.३॥ ३३॥

प्रत्यक्षयन्ति परिशुद्धधियो यथावत्
रामायणे रघुपुरन्दर पादरक्षे ।
शश्वत्प्रपञ्चित मिदम्परयैव वृत्त्या
सङ्क्षेप विस्तर दशासु तवानुभावम् ॥ ३.४॥ ३४॥

अल्पश्रुतै रपि जनै रनुमीयसे त्वं
रङ्गेश पादु नियतं निगमोप गीता ।

सारं तदर्थ मुपबृंहयितुं प्रणीतं
रामायणं तव महिम्नि यतः प्रमाणम् ॥ ३.५॥ ३५॥

तिष्ठन्तु श्रुतय स्ततोऽपि महितं जागर्ति तत्पादुके
तत्तादृक्प्रथनाय तावक गुण ग्रामाय रामायणम् ।
यस्यासी दरविन्द सम्भव वधू मञ्जीर शिञ्जारव-
स्पर्धा दुर्धर पादबद्ध फणिर्ति र्वल्मीक जन्मा कविः॥ ३.६॥३६॥

भक्ति प्रह्व पुर प्रभञ्जन जटावाटी सनीड स्फुरत्
चूडारग्वध वासना परिमलस्त्याने स्तुमः पादुके ।
रङ्गक्षोणि भृदङ्घ्रि पद्मयुगली पूर्ण प्रपत्तेः फलं
निश्चिन्वन्ति विपश्चितः शमधना नित्यं यदुत्तंसनम् ॥ ३.७॥ ३७॥

मात र्माधव पादुके तव गुणान्कः स्तोतु मस्तोकधीः
कोटीरेषु यदर्पण प्रणयिनां सेवाक्षणे स्वर्गिणाम् ।
अन्योन्यं क्षिपता महम्प्रथमिका सम्मर्द कोलाहलं
विष्वक्सेन विहार वेत्रलतिका कम्पश्चिरा ल्लुम्पति ॥ ३.८॥ ३८॥

योषिद्भूत दृषन्त्य पोढ शकट स्थेमानि वैमानिक-
स्रोतस्वि न्युपलम्भनानि भसितो दञ्चत्परीक्षिन्ति च ।
दूत्यादिष्वपि दुर्वचानि पदयोः कृत्यानि मत्वेव यत्
धत्ते तत्प्रणयं तदेव चरणत्राणं वृणे रङ्गिणः ॥ ३.९॥ ३९॥

वन्दे तन्मधुकैटभारि पदयो र्मित्रं पदत्रद्वयं
यत्तद्भक्ति भरानतेन शिरसा यत्र क्वचित् बिभ्रति ।
द्वित्रब्रह्म विनाडिका वधिपद व्यत्यास शङ्काभर-
त्रासोत्कम्प दशावि संस्थुल धृति स्त्रैविष्टपानां गणः ॥ ३.१०॥ ४०॥

पद्माकान्त पदान्तरङ्ग विभवोद्रिक्तं पदत्रं भजे
यद्भक्त्या नमतां त्रिविष्टप सदां चूडापदेष्वर्पितम् ।
नित्यापीत नखेन्दु दीधिति सुधा सन्दोह मुच्चैर्वमति
अन्तर्नून ममान्त मन्ति कलसच्छेषा पटच्छद्मना ॥ ३.११॥ ४१॥

तद्विष्णोः परमं पदत्रयुगलं त्रय्यन्त पर्यन्तगं
चिन्तातीत विभूतिकं वितरतु श्रेयांसि भूयांसि नः ।
यद्विक्रान्ति दशा समुत्थितपद प्रस्यन्दि पाथस्विनी-
सख्येनेव सदानतस्य तनुते मौलौ स्थितिं शूलिनः ॥ ३.१२॥ ४२॥

अम्बुन्यम्बुनिधे रनन्य गतिभि र्मीनैः कियद् गम्यते
क्लेशेनापि कियद्व्यलङ्घि रभसोत्तुङ्गैः प्लवङ्गेश्वरैः ।
विज्ञाता कियती पुनः क्षितिभृता मन्थेन गम्भीरता
किं तैः केशव पादुका गुणमहाम्बोधे स्तटस्था वयम् ॥ ३.१३॥ ४३॥

पदकमल रजोभि र्वासिते रङ्गभर्तुः

परिचित निगमान्ते पादुके धारयन्तः ।
अविदित परिपाकं चन्द्र मुत्तंसयन्ते
परिणत भुवनं तत्पद्म मध्यासते वा ॥ ३.१४॥ ४४॥

सकृदपि किल मूर्ध्ना शार्ङ्गिणः पादुके त्वां
मनुज मनुवहन्तं देहबन्ध व्यपाये ।
उपचरति यथार्हं देववर्ग स्त्वदीयः
स तु नियमितभृत्यो जोषमास्ते कृतान्तः ॥ ३.१५॥ ४५॥

पद सरसिज मेतत्पादुके रङ्गभर्तुः
प्रतिनिधि पदवीं ते गाहते स्वेन भूम्ना ।
तदिद मपरथा चेत् तिष्ठत स्तस्य नित्यं
कथमिव विदितार्था स्त्वां भजन्ते महान्तः ॥ ३.१६॥ ४६॥

श्रुति शिरसि निगूढं कर्मणां चोदितानां
त्वदवधि विनिवेशं नाधिगन्तुं क्षमाणाम् ।
परिहसति मुरारेः पादुके बालिशानां
पशुवध परिशेषान् पण्डितो नामयज्ञान् ॥ ३.१७॥ ४७॥

जनयितु मलमर्घ्यं दैत्यजित्पादरक्षे
नमति महति देवे नाकसिन्धो र्विशीर्णाः ।
मुहुरहि पति चूडा मौलि रत्नाभि घातात्

परिणत लघिमानः पाथसा मूर्मयस्ते ॥ ३.१८॥ ४८॥

पदसरसिजयो स्त्वं पादुके रङ्गभर्तुः
मनसि मुनिजनानां मौलिदेशे श्रुतीनाम् ।
वचसि च सुकवीनां वर्तसे नित्यमेका
तदिद मवगतं ते शाश्वतं वैश्वरूप्यम् ॥ ३.१९॥ ४९॥

परिसर विनतानां मूर्ध्नि दुर्वर्ण पङ्क्तिं
परिणमयसि शौरेः पादुके त्वं सुवर्णम् ।
कुहकजन विदूरे सत्पथे लब्धवृत्तेः
क्क नु खलु विदितस्ते कोऽप्यसौ धातुवादः ॥ ३.२०॥ ५०॥

बलिमथन विहाराद् वर्धमानस्य विष्णोः
अखिल मतिपतद्भि र्विक्रमै रप्रमेयः ।
अवधि मनधि गच्छन्पापराशि र्मदीयः
समजनि पदरक्षे सावधि स्त्वन्महिम्ना ॥ ३.२१॥ ५१॥

तटभुवि यमुनाया स्तस्थुषी यन्निवेशात्
भजति निगम शाखा वैभवं नीप शाखा ।
पदकमल मिदं तत्पादुके रङ्गभर्तुः
त्वयि भजति विभूतिं पश्य शाखानु शाखाम् ॥ ३.२२॥ ५२॥

शिरसि विनिहितायां भक्तिनम्रै र्भवत्यां
        सपदि तनुभृतस्ता मुन्नतिं प्राप्नुवन्ति ।
मधुरिपु पदरक्षे यद्वशेनैव तेषां
        अनितर सुलभं तद्धाम हस्तापचेयम् ॥ ३.२३॥ ५३॥

सकृदपि भुवनेऽस्मिन् शार्ङ्गिणः पादुके त्वाम्
        उपनिष दनुकल्पै रुत्तमाङ्गै र्दधानाः ।
नरकमिव महान्तो नाकमुल्लङ्घयन्तः
        परिषदि निविशन्ते प्राक्तनानां गुरूणाम् ॥ ३.२४॥ ५४॥

शमदम गुणदान्तो दन्तवै देशिकानां
        शरण मशरणानां मादृशां माधवस्य ।
पदकमलमिदं ते पादुके रक्ष्यमासीत्
        अनुदय निधनाना मागमानां निधानम् ॥ ३.२५॥ ५५॥

परिचित पदपद्मां पादुके रङ्गिणस्त्वां
        त्रिभुवन महनीयां सादरं धारयन्तः ।
निजशिरसि निलीनं देवि मन्दार माल्यं
        निगम परिमलैस्ते वासयन्तीव देवाः ॥ ३.२६॥ ५६॥

कनकसरि दनूपे कल्पवृक्षस्य भूष्णोः
        पदकिसलय लग्ना पादुके मञ्जरी त्वम् ।

परिणति मधुराणां या फलानां सवित्री
वहसि निगम वृन्दैः सम्पदं षट्पदानाम् ॥ ३.२७॥ ५७॥

परिकलयसि चेन्मां पद्मवासा निषेव्ये
पदकमल युगे त्वं पादुके रङ्गभर्तुः ।
अविदित निगमानां नून मस्मादृशानां
अघटितघटनी ते शक्ति राविष्कृता स्यात् ॥ ३.२८॥ ५८॥

श्रुतिशत शिरश्चूडापीडे निपीडयितुं क्षमे
दुरित सरिता मोघा नेता नमोघ विसर्पिणः ।
क्रम परिणम द्वेधः श्रेणी शिखामणि घट्टनान्
मसृणित तले रङ्गक्षोणी भृतो मणिपादुके ॥ ३.२९॥ ५९॥

जगज्जनन रक्षण क्षपण सङ्गिनो रङ्गिणः
पवित्र तम माद्रिये भगवतः पदत्रद्वयम् ।
शिवत्व करण क्षम त्रिदिव सिन्धु सम्बन्धिनं
प्रधाव्य चरणं निजं प्रणिदधाति यत्र प्रभुः ॥ ३.३०॥ ६०॥

यदध्वर भुजां शिरः पदयुगं च रङ्गेशितुः
दृढं घटयितुं क्षमं भवति शेष शेषित्वतः ।
शिरस्त्र मिद मस्तु मे दुरित सिन्धु मुष्टिन्धयं
कदध्व विहति क्षमं किमपि तत्पदत्र द्वयम् ॥ ३.३१॥ ६१॥

समुत्क्षिपति चेतसि स्थिर निवेशिता तावकी
मुकुन्द मणिपादुके मुहु रुपासना वासना ।
उदर्कपरि कर्कशा नुपरि पर्वणा खर्वितान्
अनर्थ शतगर्भिता नमर शम्भली विभ्रमान् ॥ ३.३२॥ ६२॥

विगाहन्ते रङ्ग क्षितिपति पदत्रायिणि सकृत्
वहन्त स्त्वामन्त र्विनिहित कुचेल व्यतिकराः ।
मदोद्दाम स्तम्बे रमकरट निर्यन्मधुझरी-
परीवाह प्रेङ्खद्भ्रमर मुखरा मङ्गण भुवम् ॥ ३.३३॥ ६३॥

अधिदैवत मापतत्सु कल्पेषु अधिकारं भजतां पितामहानाम् ।
अभिरक्षतु रङ्गभर्तुरेषा करुणा काचन पादुकामयी नः ॥ ३.३४॥ ६४॥

ध्रुवमिन्द्रिय नाग शृङ्खला वा निरयद्वार निवारणार्गला वा ।
अनपाय पदाधि रोहणी वा मम रङ्गेश विहार पादुके त्वम् ॥ ३.३५॥ ६५॥

शरणागत सार्थवाह शीलां श्रुतिसीमन्त पदप्रसाद नार्हाम् ।
अधिरङ्ग मुपास्महे मुरारेः महनीयां तपनीय पादुके त्वाम् ॥ ३.३६॥ ६६॥

इह ये भवतीं भजन्ति भक्त्या
कृतिनः केशवपादुके नियुक्ताः ।

कथयाम्ब तिरोहितं तृतीयं
नयनं त्रीणि मुखानि वा किमेषाम् ॥ ३.३७॥ ६७॥

मधुवैरि परिग्रहेषु नित्यं क्षमया त्वं मणिपादुके समेता ।
तदपि क्षमसे न किं परेषां त्रिदशाधीश्वर शेखरे निवेशम् ॥ ३.३८॥ ६८॥

द्वितयं प्रतियन्ति रङ्गभर्तुः कतिचित् काञ्चन पादुके शरण्यम् ।
अभयान्वित मग्रिमं करं वा भवती शेखरितं पदाम्बुजं वा ॥ ३.३९॥ ६९॥

भरता श्वसनेषु पादशब्दं वसुधा श्रोत्र समुद्भवो मुनीन्द्रः ।
पठति त्वयि पादुके ततस्त्वं नियतं रामपदा दभिन्न भूमा ॥ ३.४०॥ ७०॥

मकुटेषु निविश्य दिक्पतीनां पदमेव प्रतिपद्य दैत्य हंतुः ।
परिरक्षसि पादुके पदं त्वं क नु भिद्येत गरीयसां प्रभावः ॥ ३.४१॥ ७१॥

जगता मभिरक्षणे त्रयाणां अधिकारं मणिपादुके वहन्त्योः ।
युवयोः परिकर्म कोटिलग्नं चरणद्वन्द्व मवैमि रङ्गभर्तुः ॥ ३.४२॥ ७२॥

पदरक्षिणि वत्सला निकामं रघुवीरस्य पदाम्बुजादपि त्वम् ।
यदसौ भरतस्त्वयांशवत्त्वात् न पुनस्तादृश मन्वभूद्वियोगम् ॥ ३.४३॥ ७३॥

अभिगम्य मुकुन्द पादुके त्वां अपनी तातप वारणैः शिरोभिः ।

हरितां पतयो दुरापमन्यैः अनघच्छाय मवाप्नुवन्ति भोगम् ॥ ३.४४॥ ७४॥

अपहाय सितासिता नुपायान् अरविन्देक्शण पादुके महान्तः ।
त्वदनन्य तया भजन्ति वृत्तिं त्वदसाधारण भोग साभिलाषाः॥ ३.४५॥ ७५॥

प्रणमन्ति न वा विधेर्विपाकात् य इमे रङ्ग नरेन्द्र पादुके त्वाम् ।
उपजात मनुत्तमाङ्ग मेषां उभयेषा मपि चित्र मुत्तमाङ्गम् ॥ ३.४६॥ ७६॥

तव केशव पादुके प्रभावो मम दुष्कर्म च नन्वनन्तसारे ।
नियमेन तथाऽपि पश्चिमस्य प्रथमेनैव पराभवं प्रतीमः ॥ ३.४७॥ ७७॥

अस्त्र भूषण तयैव केवलं विश्वमेत दखिलं बिभर्ति यः ।
अक्लमेन मणिपादुके त्वया सोऽपि शेखरतयैव धार्यते ॥ ३.४८॥ ७८॥

रामपाद सहधर्मचारिणीं पादुके निखिल पातकच्छिदम् ।
त्वामशेष जगता मधीश्वरीं भावयामि भरताधि देवताम् ॥ ३.४९॥ ७९॥

चूडाकपाल व्यतिषङ्ग दोषं विमोचयिष्य न्निव विष्णुपद्याः ।
कृतादरः केशव पादरक्षे बिभर्ति बालेन्दु विभूषण स्त्वाम् ॥ ३.५०॥ ८०॥

त्वयैव नित्यं मणिपादरक्षे राजन्वती सृष्टिरियं प्रजानाम् ।
स्त्रीराज्य दोष प्रशमाय नूनं निर्दिश्यसे नाथ विशेषणेन॥ ३.५१॥ ८१॥

बिभर्षि नित्यं मणिपादुके त्वं विश्वम्भरं धाम निजेन भूम्ना ।
तवानुभाव श्चुलकी कृतोऽयं भक्तै रजस्रं भवतीं दधानैः ॥ ३.५२॥ ८२॥

परस्य पुंसः पदसन्निकर्षे तुल्याधिकारां मणिपादुके त्वाम् ।
उत्तंसयन्ति स्वयमुत्तमाङ्गैः शेषासमं शेषगरुत्मदाद्याः ॥ ३.५३॥ ८३॥

मुकुन्द पादाम्बुज धारिणि त्वां मोहा दनुत्तंसयतां जनानाम् ।
मूर्ध्नि स्थिता दुर्लिपयो भवन्ति प्रशस्तवर्णा वलयस्तदीयाः ॥ ३.५४॥ ८४॥

भूमिः श्रुतीनां भुवनस्य धात्री गुणौरनन्ता विपुला विभूत्या ।
स्थिरा स्वयं पालयितुं क्षमा नः सर्वंसहा शौरिपदावनि त्वम् ॥ ३.५५॥ ८५॥

स्थैर्यं कुलक्षोणि भृतां विधत्से
शेषादय स्त्वां शिरसा वहन्ति ।
पदप्रसूता परमस्य पुंसः
पृथ्वी महिम्ना मणिपादुके त्वम् ॥ ३.५६॥ ८६॥

दैत्याधिपानां बलिनां किरीटा
निक्षेपणं ते यदि नाभ्यनन्दन् ।
रङ्गेश पादावनि रङ्गधाम्नः
सोपानतां प्राप्य वहन्त्यमी त्वाम् ॥ ३.५७॥ ८७॥

शेषो गरुत्मान् मणिपाद पीठी
त्वं चेति पादावनि विश्वमान्याः ।
तुल्याधिकारा यदि किन्तु सन्तः
त्वामेव नित्यं शिरसा वहन्ति ॥ ३.५८॥ ८८॥

परस्य पुंसः परमं पदं तत्
बिभर्षि नित्यं मणिपादुके त्वम् ।
अन्यादृशां व्योमसदां पदानि
त्वय्यायतन्ते यदिदं न चित्रम् ॥ ३.५९॥ ८९॥

पादौ मुरारेः शरणं प्रजानां तयोस्तदेवासि पादावनि त्वम् ।
शरण्यताया स्त्वमनन्य रक्षा सन्दृश्यसे विश्रम भूमिरेका ॥ ३.६०॥ ९०॥

अन्येषु पद्मा कमलासनाद्यैः अङ्गेषु रङ्गाधिपतेः श्रितेषु ।
पदावनि त्वामधिगम्य जातं पदं मुरारे रधिदैवतं नः ॥ ३.६१॥ ९१॥

क्षणं सरोजेक्षण पादुके यः कृतादरः किङ्कुरुते भवत्याः ।
अकिञ्चिनस्यापि भवन्ति शीघ्रं भ्रूकिङ्करा स्तस्य पुरन्दराद्याः ॥ ३.६२॥ ९२॥

वहन्ति ये माधव पादुके त्वामुह्यन्त एते दिवि निर्विघाताः ।
हंसेन नित्यं शरदभ्र भासा कैलास गौरेण ककुद्मता वा ॥ ३.६३॥ ९३॥

रुद्रं श्रितो देवगणः स रुद्रः
पद्मासनं सोऽपि च पद्मनाभम् ।
स त्वामनन्तो न पुनस्त्व मन्यं
क एष पादावनि ते प्रभावः ॥ ३.६४॥ ९४॥

परस्य धाम्नः प्रतिपादनार्हां वदन्ति विद्यां मणिपादुके त्वाम् ।
यतस्तवै वाधिगमे प्रजानां दूरीभव त्युत्तर पूर्वमंहः ॥ ३.६५॥ ९५॥

धन्या मुकुन्दस्य पदानुषङ्गात् हनीयता येन समर्चिता त्वम् ।
वासस्तदीयो मणिपादरक्षे लक्ष्म्याऽलकाम प्यधरीकरोति ॥ ३.६६॥ ९६॥

पदेन विष्णोः किमुतेतरेषां
विसृज्य सङ्गं समुपासते त्वाम् ।
करोषि तान्किं त्वमपेत कामान्
कालेन पादावनि सत्यकामान् ॥ ३.६७॥ ९७॥

अभ्यास योगेन निगृह्यमाणैः अन्तर्मुखै रात्मविदो मनोभिः ।
मातस्त्वया गुप्तपदं प्रभावात् अन्वेषयन्त्यागमिकं निधानम् ॥ ३.६८॥ ९८॥

मूर्ध्ना दधानां मणिपादुके त्वां उत्तंसितं वा पुरुषं भवत्या ।
वदन्ति केचिद्द्वयमाम नामः त्वामेव साक्षा दधिदैवतं नः ॥ ३.६९॥ ९९॥

मूर्ध्नां सता मधस्तात् उपरिच विष्णोः पदेन सङ्घटिताम् ।
अदवीयसीं विमुक्तेः पदवी मवयन्ति पादुके भवतीम् ॥ ३.७०॥ १००॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
प्रभाव पद्धति स्तृतीया ॥